# Upadesha Panchadashi

# ઉપદેશપઞ્ચદશી

## Document Information

Text title : Upadesha Panchadashi

File name : upadeshapanchadashI.itx

Category : major_works, upadesha, advice, panchadashI

Location : doc_z_misc_major_works

Author : Satyanarayan Sharma

Transliterated by : Sumedh Sathaye

Proofread by : Sumedh Sathaye, NA

Latest update : September 10, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 11, 2024

*sanskritdocuments.org*

# ઉપદેશપઞ્ચદશી

અહો લોકા યૂયં કિમિહ વિતથે વિશ્વવિષયે
વૃથા સત્ત્વં મત્ત્વા સતતમનુરક્તા હતધિયઃ ।
પિતા માતા ભ્રાતા તનયતનયાદ્યાઃ પરિજનાઃ
ક્વ યાતા વિશ્લેષોઽપિ ન મનસિ યેષામનુમિતઃ ॥ ૧॥

યદુત્પન્નં વિત્તં કૃતવિવિધયત્નૈરવિહિતૈઃ
સમુત્સૃજ્ય પ્રાણાનપિ વદત તદ્વઃ કિમભવત્ ।
શરીરં સ્વાદ્વન્નૈર્યદિહ પરિપુષ્ટં પ્રતિદિનં
તદેતત્સમ્ભાવ્યં કૃમિશમલભસ્માખ્યમધુના ॥ ૨॥

ગતા બાલાવસ્થા ગતમપિ ચ તારુણ્યમચિરાત્
સમાયાતં હન્ત સ્થવિરવય આગન્તુકમૃતિ ।
તથાપ્યન્તશ્ચેતસ્યહહ નહિ યુષ્માકમધુના
મહાકાલવ્યાલગ્રસનભયમાયાતિ કિમિતિ ॥ ૩॥

દુરન્તપ્રત્યાશાવધિમિહ કિમેકોઽપિ ગતવાન્
વિના રાગાભાવં વિષયરસલુબ્ધઃ કથમપિ ।
સમાલોચ્યૈતદ્ભોસ્ત્યજત વિષયાશાં ક્ષણિકતાં
તનોર્જ્ઞાત્વા શમ્ભું શરણમુપયાત દ્રુતતરમ્ ॥ ૪॥

ઉપાસ્તિર્યુષ્માભિઃ કિમિહ નિરપેક્ષસ્ય ક્રિયતે
કલત્રાદેર્મૂઢા મુહુરનુભવદ્ભિઃ પરિભવાન્ ।
અરેભક્તાપેક્ષં કૃપણજનબન્ધું સકરુણં
શિવં શાન્તાકારં શરણમુપયાત દ્રુતતરમ્ ॥ ૫॥

ધનં મે ધાન્યં મે શયનમશનં મે પરિજનઃ
કુલં મે કૌલં મે કૃપમિતિ લપન્તં બહુવિધમ્ ।
અકસ્માદાયાતોઽનવહિતજનં કાલપુરુષઃ
શરીરાદાકર્ષત્યકરુણતરસ્ત્રસ્તહૃદયમ્ ॥ ૬॥

પ્રભાતાદારભ્ય પ્રતિદિવસમસ્વસ્થહૃદયૈ-
ર્ભવદ્ભિશ્ચિન્ત્યન્તે ધરણિધનધામાનિ પશવઃ ।
પ્રિયાઃ પુત્રા મિત્રાણ્યનવરતમાસ્વાપસમયં
કદાચિત્સ્વપ્નેઽપિ સ્મૃતિવિષયતાં નૈતિ ભગવાન્ ॥ ૭॥

ય એતે દૃશ્યન્તે સકલવિષયાસ્તેઽપ્યવિષયાઃ
ભવિષ્યન્તિ પ્રાણોત્ક્રમણસમયે પૂરુષદૃશઃ ।
ગૃહિત્વા પાથેયં સુકૃતિકુકૃતી યાતિ પુરુષો
મહત્યાં યાત્રાયાં તત ઇહ નિષેવ્યાસુભકૃતિઃ ॥ ૮॥

પ્રવૃત્તિઃ સર્વેષાં ભવતિ સુખસિદ્ધ્યૈ તનુભૃતાં
સમાલોચ્યં સૂક્ષ્મં નિયતમનસા કિં સુખમિતિ ।
પ્રસન્નત્વં સત્ત્વં પ્રભવમનપાયં હિ મનસઃ
સુખં દોષાપન્નં તદિતરસુખં વેદ્યમસુખમ્ ॥ ૯॥

યદુત્પત્તૌ દુઃખં ભવતિ ખલુ ગુપ્તૌ યત ઇદં
યતોઽપાયેઽપ્યેતદ્વદત કથમેત્સુખમહો ।
લભન્તે યદ્યુક્તા નિરતિશયિતં સ્વાત્મનિ સુખં
તદેવાહુસ્તજ્જ્ઞાઃ સુખમિતિ સમાધાનનિપુણાઃ ॥ ૧૦॥

બહૂન્ ક્લેશાન્ ભુક્ત્વા મનુજજનુરાસાદ્ય તપસા
વ્યતીતેઽસઙ્ખ્યાતેઽધમપશુપતત્રાદિજનુષિ ।
પુનઃ પાતું માતુસ્સ્તનમિહ ભવન્તો નરમૃગાઃ
પ્રવૃત્તા દુર્વૃત્તાઃ કથયત કિમેતદ્વ્યવસિતમ્ ॥ ૧૧॥

ય એતે મન્યન્તે મનુજમિહ કર્ત્તારમબુધા-
સ્તએતે સમ્ભ્રાન્તા વિતથમતવાદાય નિપુણાઃ ।
દરિદ્રં વિદ્વાંસં શ્રમકલિતનાનોદ્યમપરં
નિરુદ્યોગં મૂર્ખં ધનિનમલસં પશ્યત ભુવિ ॥ ૧૨॥

ભવન્તશ્ચિન્તાભિર્વ્યથિતહૃદયામ્લાનવદના
કુતો ભાવ્યં ભાવ્યં કિમુ ચ કિમુ ભાવ્યં ન ભવતિ ।
કૃતાયાં ચિન્તાયાં વદત ફલમાપ્યં કિમથવા
સમાધાય સ્વાન્તં કૃતફલરસં સમ્પિવત ભોઃ ॥ ૧૩॥

સ્થિતિઃ પુણ્યસ્થાનેઽમૃતમશનમાશાસુવસનં

કૃતિસ્તીર્થસ્નાનં પશુપતિપદામ્ભોરુહરુચિઃ ।
ગતિઃ સ્વાત્માયત્તા મતિરખિલવૃત્ત્યા વિરહિતા
ભવન્ત્યાનન્દાય પ્રચુરતપસાં શુદ્ધમનસામ્ ॥ ૧૪॥

જગન્મિથ્યા મિથ્યા શ્રુતિશિખરસિદ્ધાન્તવચનાત્
તથા સત્યઃ સત્યઃ શિવ ઇતિ ચ નિર્ણીય નિપુણમ્ ।
શિવં સત્યાનન્દં ભજત કરુણાપૂર્ણહૃદયં
સમાપન્ને મૃત્યૌ શરણમિહ કશ્ચિન્ન ભવિતા ॥ ૧૫॥

એષા પઞ્ચદશીનામ્ની કૃતિર્વૈરાગ્યવર્દ્ધિની ।
હૃદ્યા હૃદય આધેયા સાદરં શ્રવણાદિભિઃ ॥ ૧૬॥

જ્ઞાનસ્યોવાચ વૈરાગ્યં પરાં કાષ્ઠાં પતઞ્જલિઃ ।
વચ્મ્યહં તત્પરં જ્ઞાનં તદેવ પરમાગતિઃ ॥ ૧૭॥

ઇતિ શ્રીમિથિલાદેશાન્તરગતોદ્યાનગ્રામવાસ્તવ્યેન મૈથિલેન મહાત્મના ઝોપાહ્વ
શ્રીસત્યનારાયણશર્મ્મણા વિરચિતોપદેશપઞ્ચદશ્યાઃ સમાપ્તા ॥

Encoded and proofread by Sumedh Sathaye

*Upadesha Panchadashi*

pdf was typeset on September 11, 2024

Please send corrections to *sanskrit@cheerful.com*